Postal Regd.No. GAMC- 1553/2025-2027
ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : २० अङ्क : २३५
नवेम्बर - २०२५

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2025-2027 issued by SSP Ahmedabad. Valid upto 31-12-2027. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### अमृतस्य पदम्

केचन मनुष्याः शतं वर्षाणि जीवन्ति। केचन वा चत्वारिंशता वर्षैः एव जीवनलीलां प्रतिसंहरन्ति। तेषु अपि केचन तु 'अहं जीवामि' इति वक्तुम् एव पृथ्वीम् अवतरन्ति। तेषां जीवनेन कस्यचित् कोऽपि लाभः नास्ति। वस्तुतः ते जीवन्ति न, केवलं श्वसन्ति। जीवत्सु अपि मनुष्येषु सर्वे पूर्णतः जीवन्ति इत्यपि दृढं वक्तुं न शक्यते। प्रभातात् प्रारभ्य सायं यावत् सर्वे मनुष्याः भगवत्कृपया समानं कालं लभन्ते। परन्तु यः मनुष्यः यस्मिन् क्षणे उत्तमे कर्मणि प्रवर्तते, तदानीम् एव सः जीवति इति वक्तुं शक्यते। इतस्ततः स्खलन् मद्यपः, प्रसुप्तः अलसः वा एतस्मिन् संसारे जीवति इति वक्तुं न शक्यते। दिवसः यापितः, नाशितः, खण्डितः, चूर्णितः, क्षिप्तः वा ? अथवा दिवसः अलङ्कृतः ? तस्मिन् विषये रात्रौ अवश्यं विचारणीयम् । जीवनस्य सम्बन्धः वर्षैः सह नास्ति, अपि तु उत्कृष्टैः कर्मभिः सह वर्तते । यः आत्मानं प्रतिक्षणं कल्याणकर्मसु योजयति सः जीवति संसारे।

बहवः जनाः प्रभाते ईश्वरं पूजयन्ति। स्तोत्राणि च गायन्ति। प्रशस्यम् एव खलु इदम्। परन्तु केचन न मधुरेण स्वरेण गायन्ति, न च स्तोत्राणाम् अर्थं जानन्ति। चित्तम् अपि स्थिरं नास्ति। तादृशाः जनाः शिथिलेन श्रद्धाबलेन केवलं समयं यापयन्ति। पूजा खलु कालयापनस्य साधनं नास्ति। पूजनम् अर्थपूर्णं, ध्यानपूर्णं, भक्तिपूर्णं च भवति चेत् जीवनम् अपि प्रकाशते। ध्यानं यावत् शिथिलं, जीवनम् अपि तावत् एव मन्दम् इति निश्चितम्।

मनुष्यं परितः सकलं विश्वं व्याप्तम् इव भाति। अत्र बहुविधाः घटनाः प्रतिक्षणं जायन्ते। क्वचित् धर्मकार्यं, क्वचित् सामाजिकाः कार्यक्रमाः वा । जागरूकः मनुष्यः प्रत्येकं घटनाक्रमात् किमपि नूतनं शिक्षते । एतत् तस्य अनौपचारिकं शिक्षणम् एव। एवं विविधैः अनुभवैः सः स्वीयं जीवनम् अपि विकासयितुं, भूषयितुं, परिवर्तयितुं वा अर्हति। एषः संसारः एव खलु कश्चित् विशालः विश्वविद्यालयः वर्तते। मनुष्यस्य यावती तत्परता अधिका, तावता प्रमाणेन ज्ञानम् अधिकम्। परन्तु मूढः संसारं पश्यन् अपि गुणान् ग्रहीतुं न शक्नोति। पल्वले पतितः सूकरः पङ्कम् एव गृहीत्वा निर्गच्छति, न तु कमलिनीम् । प्रशिष्टाः सज्जनाः सर्वत्र वसन्ति । तेषां वर्तनशुद्धिः, भाषाशैली, व्यवहारकौशलम्, विवेकवैभवम्, नीतिनैपुण्यं वा सामान्यं मनुष्यं निश्चयेन आकर्षति । प्रशिष्टाः जनाः न केवलम् आदरणीयाः, अपि तु अनुसरणीयाः भवन्ति । तान् निरीक्षमाणाः वयं किमपि हितकरं शिक्षणं प्राप्तुं शक्नुमः । परन्तु ये मनुष्याः प्रमादतः महापुरुषान् उपेक्षन्ते ते अमृतम् आस्वादयितुं न शक्नुवन्ति। अतः एव भगवता बुद्धेन उक्तम् – 'अप्पमादो अमतपदं, पमादो मच्चुनो पदं।' (अप्रमादः अमृतस्य अर्थात् निर्वाणस्य पदम् अस्ति, प्रमादः मृत्योः पदम् अस्ति।)

## पराजितोऽपि अपराजितः



भारतीये इतिहासे क्रि. पू. ३२६ तमं वर्षम् अतीव महत्त्वपूर्णम् । अलेक्साण्डर् ग्रेट् (क्रि.पू. ३५३ – ३२३) इति ख्यातः ग्रीक्–चक्रवर्ती तस्मिन् वर्षे भारतम् आक्रान्तुं ससैन्यम् आगतवान् । तक्षशिलायाः राजा अम्बिः तम् अतिथित्वेन स्वागतीकृतवान् यदि न स्यात् तर्हि प्रायः सः भरतभूमौ पदं स्थापयितुं न अशक्ष्यत्। अम्बिः कश्चन महत्त्वाकाङ्क्षी जनः । नूतनानां स्नेहस्य सम्पादने समुत्सुकः । प्रतिवेशी राजा पुरुः जेतव्यः इति तस्य प्रबला इच्छा । पुरुः तु झेलंनदीपरिसरप्रदेशं न्याय्येन मार्गेण परिपालयति स्म। तदीये शासने जनाः शान्त्या निवसन्ति स्म।

अम्बिः बहून् राज्ञः स्वस्य आस्थानं प्रति निमन्त्रितवान् शक्तिशालिने आक्रामकाय राजदेयं दातव्यम् इति संसूच्य। बहवः लघुदेशशासकाः एतत् निमन्त्रणम् अङ्गीकृत्य आक्रामकस्य पदतले धनम् अर्पितवन्तः अपि। किन्तु अभिमानधनः पुरुः तु एतस्य विरोधं कृतवान्।

तेषु दिनेषु भारतीयाः राजानः गजान् प्रशिक्ष्य युद्धे उपयुञ्जते स्म। ग्रीकाः तु न जानन्ति स्म यत् महाकारकाः गजाः कथं प्रशिक्षणीयाः, युद्धे च कथम् उपयोक्तव्याः इति। एतां प्रशिक्षणकलां तान् अम्बिः एव बोधितवान्।

पुरोः अविधेयताम् असहमानः अलेक्साण्डरः झेलम्नदीतीरपर्यन्तं गतवान् ससैन्यम् । नदी जलेन पूर्णा आसीत्। तस्याः क्रमणं सरलं न आसीत्। अलेक्साण्डरस्य सैन्यं नौकया नदीक्रमणाय उद्युक्तम्। पुरोः सैनिकाः ताः नौकाः नाशितवन्तः। एतस्मिन् प्रयत्ने यद्यपि असङ्ख्याः सैनिकाः प्राणैः वियुक्तम् जाताः, तथापि अलेक्साण्डरः तत् न परिगणितवान्। वस्तुतः तु तस्य युद्धस्य किञ्चन तन्त्रम् आसीत् तत्। यदा पुरोः सैनिकाः अलेक्साण्डरस्य नौकानां नाशने एव दत्तावधानाः आसन् तदा अम्बेः सैनिकाः अल्पगभीरतायुक्तं स्थलम् अन्विष्य पादाभ्यां नदीक्रमणे निरताः आसन्। एषः प्रयासः पुरुणा न लक्षितः एव।

नदीं क्रान्तवतः अलेक्साण्डरस्य पुरोः च सैन्ययोः महत् युद्धं प्रवृत्तम् । समग्रं दिनं यावत् अनुवृत्तं तत् युद्धम्। वस्तुतः तत् समानयोः युद्धं न आसीत्। पुरोः सैन्यं विंशतिसहस्र–सैनिकमितम्। अम्बि–अलेक्साण्डरयोः तु अतुलं सैन्यम्। अतः एतस्मिन् युद्धे पुरोः सर्वे सैनिकाः प्राणैः वियुक्ताः जाताः।

सूर्यास्तसमये रणरङ्गे अश्वारूढः पुरुः एकः एव अवशिष्टः शत्रून् धैर्येण सम्मुखीकुर्वन्। अलेक्साण्डरः एतत् दृष्ट्वा आश्चर्यचकितः।

अम्बिः उच्चस्वरेण तं बोधितवान् – ''असहायः अस्ति भवान्। अतः शरणं गच्छतु'' इति। एतत् श्रुत्वा

क्रुद्धः पुरुः उच्चैः अवदत् – ''अये भीरो ! राष्ट्रद्रोहिन् । अपसरतु मम दृष्टिपथात्'' इति । अम्बिः लज्जया ततः निर्गतवान् । पुरुः नितरां व्रणितः आसीत् । नवाधिकस्थलेभ्यः रक्तं स्रवति स्म । तथापि सः अल्पाम् अपि धैर्यच्युतिं न दर्शितवान् । अलेक्साण्डरस्य सैनिकाः तम् आक्रम्य बद्धवन्तः, अलेक्साण्डरस्य समीपं नीतवन्तः च । 'दयनीयां दशां प्राप्तवन्तं शत्रुराजं दृष्ट्वा अलेक्साण्डरः अट्टहासं कुर्यात्, तस्य शिरश्छेदं वा कारयेत्' इति चिन्तनम् आसीत् तेषाम् । यतः ते तस्य क्रूरतां जानन्ति स्म ।

पूर्वं कदाचित् तदीयः सुहृत् अस्वस्थः जातः आसीत् । तदा तं परीक्षितवन्तः वैद्याः अवदन् यत् हिमखण्डमिश्रितं मद्यं न सेवनीयं, मांसम् अपि परिवर्जनीयम् इति । किन्तु अस्वस्थः सः सुहृत् वैद्यानाम् आदेशम् उपेक्ष्य अपथ्यं सर्वं सेवितवान्, प्राणैः वियुक्तः जातः च । एतत् दृष्ट्वा नितरां क्रुद्धः अलेक्साण्डरः चिकित्सां कृतवतां सर्वेषां वैद्यानां, तस्मिन् ग्रामे निवसतां सर्वेषां जनानां च शिरश्छेदम् कारितवान् आसीत् सः । एतादृशानि बहूनि नृशंसकृत्यानि कारितवान् आसीत् सः इतः पूर्वम् ।

पर्शियादेशे युद्धावसरे अलेक्साण्डरः बहून् समर्थान् राज्ञः दृष्टवान् आसीत् । किन्तु पुरुसदृशः तु तेन इतः पूर्वं न दृष्टः एव आसीत्, यश्च एकाकी सन् अपि रणरङ्गे युद्धं कृतवान् ।

कारागारं गतः अलेक्साण्डरः पुरुं सकृत् साभिमानं दृष्टवान् । सः जानाति स्म यत् अम्बिः द्रोहं यदि न कृतवान् स्यात् तर्हि पुरुः एवं पराजितः न अभविष्यत् इति ।

''पुरुवर्य ! युद्धं तु समाप्तम् । भवान् इदानीं मम बन्दी । मया इदानीं कथं व्यवहरणीयम् इति अभिप्रैति भवान् ?'' इति हसन् पृष्टवान् अलेक्साण्डरः ।

''अलेक्साण्डरवर्य ! समर्थः योद्धा सर्वदापि अन्येन समर्थेन योद्ध्रा सह समानतया व्यवहरेत्'' इति गाम्भीर्येण अवदत् पुरुः ।

''भवतु ! अहं भवता सह समानतया व्यवहरिष्यामि । किम् अन्या कापि अपेक्षा अस्ति भवतः ?'' इति पृष्टवान् अलेक्साण्डरः ।

''समानः व्यवहारः यदि भवता क्रियेत तर्हि मम अपेक्षाः सर्वाः पूरिताः इव । अन्या कापि अपेक्षा नास्ति मम'' इति अवदत् पुरुः ।

अलेक्साण्डरः पुरोः वचनैः सन्तुष्टः जातः । अतः सः पुरोः राज्यं न स्वायत्तीकृतवान् । पुरुं सगौरवं विमुक्तवान् सः ।

एतस्य प्रतिस्पन्दरूपेण पुरुणा अपि अलेक्साण्डरविषये आदरपूर्णः मैत्रीमयः एव व्यवहारः कृतः इति पुनः वक्तव्यं नास्ति खलु ? धैर्यं, गौरवपूर्णः व्यवहारः च शत्रोः हृदये अपि महत् परिवर्तनं कर्तुम् अर्हति इत्यस्य प्रत्यक्षम् उदाहरणम् अस्ति एषा घटना ।

राजा पुरुः अलेक्साण्डरः च परस्पर–व्यवहारेण सन्तुष्टौ आस्ताम् । किन्तु अम्बिः तु जीवने महान्तं खेदं प्राप्तवान् ।

## अभिज्ञानशाकुन्तलम् ( ग्रन्थपरिचयः )

✍ व्योम शाहः



कविकुलगुरुकालिदासविरचिते अभिज्ञानशाकुन्तलाख्ये नाटके एतावताऽस्माभिः दृष्टं यत् –मृगयार्थं दुष्यन्तेन वने चरता कश्चिद् मृगः अनुसृतः। स च कण्वशिष्येण वैखानसेन रुद्धः बोधितश्च। ब्राह्मणवचनं श्रुत्वा दुष्यन्तः स्वीयं सायकं प्रतिसंहृतवान्।

वैखानसः दुष्यन्तस्य प्रतिसंहरणं प्रशंसति। आतिथेयसत्काराय आश्रमं प्रति आमन्त्रितः दुष्यन्तः महर्षेः कण्वस्य उपस्थितिं पृच्छति।

तापसेन तेषां महर्षीणां सोमतीर्थगमनं दुहितुश्च शकुन्तलायाः आतिथेयसत्काराय महर्षीणां निदेशनं च राज्ञे निवेदितम्। ततः राजा सूतश्च आश्रमं प्रति गच्छतः। आश्रमं शान्तं दृश्यते। मृगाः चरन्ति। पक्षिणः क्रीडन्ति। आश्रमे उपरोधः न भवेद् इति चिन्तयित्वा राजा रथाद् अवतीर्णवान्। सः धनुः आभरणानि च सूताय अर्पितवान्। आश्रमं प्रविष्टस्य तस्य दक्षिणः बाहुः स्फुरति।

किञ्चिद् विचार्य सः अग्रे गच्छति। तत्रैव निकटे आश्रमकन्याः घटेन लघुपादपान् जलेन सिञ्चन्ति। ततः शकुन्तला प्रियंवदा अनसूया च परस्परं वार्तालापं कुर्वत्यः प्रविशन्ति। शकुन्तलायै पादपाः सहोदराः इव। प्रथमं ताः कुसुमिनः पादपान् सिञ्चन्ति ततः कुसुमविकसनकालम् अतिक्रान्तान् पादपान् सिञ्चन्ति।

इतश्च दुष्यन्तः पादपान्तरितः भूत्वा सर्वमपि संलापं शृणोति। सख्यः मिथः पादपानां वृद्धिं परिशीलयन्ति। सहसा अकाले मुकुलितां माधवीलतां प्रति तासां ध्यानम् आकृष्टम्। प्रियंवदा ऋषेः कण्वस्य वचनं स्मरति यद् ईदृशं तस्य विकसनं कल्याणस्य चिह्नम्। पुनरपि ताः पादपान् सिञ्चन्ति। तदैव कश्चिद् भ्रमरः शकुन्तलां बाधितुम् आरब्धवान्। भयाकुला शकुन्तला सखीभ्यां रक्षार्थं निवेदयति। सख्यौ अपि कथयतः यत् ते त्रातुं न शक्नुतः।

तपोवनानि राजरक्षितानि भवन्ति अतः दुष्यन्तः एव विनिवेद्यः। आत्मानं प्रकटयितुम् एषः राज्ञे अद्वितीयः अवसरः। सः चिन्तयति यद् एवं कृते सति 'अयमेव राजा' इति तासां परिज्ञानं भविष्यति।

अतः सः भिन्नतरेण उपायेन प्रविशति।

**कः पौरवे वसुमतीं शासति शासितरि दुर्विनीतानाम्।**
**अयमाचरत्यविनयं मुग्धासु तपस्विकन्यासु ॥**

भ्रमरबाधा निवर्तिता। कन्याः संमिल्य स्वागतम् आतिथ्यं च आचरन्ति। राज्ञः निवेदनपुरःसरं ताः वार्तालापं कर्तुम् उपविशन्ति। उपविष्टे सति शकुन्तलायाः मनसि विकारः उत्पद्यते। अनसूया कुतूहलेन पृच्छति यत् कुत्र स वसति कुतश्च सः समागतः ? राजा किञ्चिद् विचार्य 'नगरधर्माक्षिकारे नियुक्तः पुण्याश्रमदर्शनार्थम् आगतः' इत्युक्त्वान्।

( क्रमशः... )

# मासवार्त्ताः

### आरब्धः "Diploma in Sanskrit Teaching" अभ्यासक्रमः ।

संस्कृतमाध्यमेन संस्कृतं पाठयितुं समर्थानां शिक्षकाणां प्रशिक्षणाय एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं "Diploma in Sanskrit Teaching" इति अभ्यासक्रमं सञ्चालयति। एतस्मिन् वर्षेऽपि सप्टेम्बरमासस्य ४ दिनाङ्के अभ्यासक्रमोऽयं आरब्धः वर्तते। ३३ छात्राः अभ्यासक्रमेऽस्मिन् प्रवेशं स्वीकृतवन्तः। अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह संलग्नः वर्तते। अभ्यासक्रमेऽस्मिन् छात्राः संस्कृतशिक्षकप्रशिक्षणं ग्रहीष्यन्ति।

### विदेशीयानां छात्राणां कृते आरब्धौ बालसंस्कृतवर्गौ

संस्कृतं पठितुम् इच्छुकानां विदेशीयच्छात्राणां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन -Online संस्कृतवर्गाः आरब्धाः सन्ति । आयोजनेऽस्मिन् बालकानां कृते "Value Education through Sanskrit" बालसंस्कृतवर्गौ आरब्धौ वर्तेते । अभ्यासक्रमेऽस्मिन् अमेरीकादेशस्य केनेडादेशस्य च छात्राः अध्ययनं करिष्यन्ति। अभ्यासक्रमेऽस्मिन् १ कक्ष्यातः ७ कक्ष्यायाः बालकाः आवर्षं सप्ताहे एकवारं संस्कृतभाषायाः अध्ययनं करिष्यन्ति। श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेलः च छात्रेभ्यः मार्गदर्शनं दास्यन्ति।

### केपजेमिनी-मेलायां संस्कृतम्






गान्धिनगरे गिफ्टसीटीस्थाने केपजेमिनीसंस्थानं प्रतिवर्षं दीपावलीमेलाम् आयोजयन्ति यस्मिन् विविधाः संस्थाः स्वकार्यपरिचयं कारयन्ति । ऑक्टोबरमासस्य १४ दिनाङ्के सम्पन्ने कार्यक्रमेऽस्मिन् एकलव्य-संस्कृत-एकेडेमीसंस्थानम् अपि भागम् अवहत्। संस्थानस्य शिक्षिकाः श्रीमती सङ्गीता मिस्त्री, श्रीपारुलः व्यासः, श्रीदिशा परमारः च संस्थाप्रवृत्तिविषये जनान् अबोधयन्।

## सर्वेभ्यः पाठकेभ्यः दीपावल्याः शुभकामनाः नूतनवर्षाभिनन्दनानि च ।

## कृपया हसन्तु

**नमन: - (रमणं प्रति) भो: मित्र ! अधुना क: विशेष: ?**
**रमण: - नूतनं वर्षम् आरब्धं स: एव विशेष: ।**
**नमन: - नूतने वर्षे त्वं कं सङ्कल्पं कृतवान् ?**
**रमण: - अहं प्रतिदिनं शीघ्रम् उत्थास्यामि, व्यायामं च करिष्यामि । इत्येव सङ्कल्प: ।**
**नमन: - आवर्षस्य सङ्कल्पोऽयम् ?**
**रमण: - न, न । एकसप्ताहस्य एव ।**

★ ★ ★ ★ ★

**शिक्षक:- (छात्रान् उद्दिश्य) भो: छात्रा: ! नववर्षे सर्वे किमपि नूतनम् अवश्यं पठन्तु ।**
**रमण: - महोदय, अहं नूतनं पुस्तकं पठितवान् ।**
**शिक्षक:- उत्तमम् । तस्मिन् किं लिखितम् आसीत् ?**
**रमण: - न ज्ञातवान् यतोहि भाषापि नूतना आसीत् खलु ।**

★ ★ ★ ★ ★

**पत्नी - (पतिम् उद्दिश्य) आर्य ! शीघ्रम् उत्तिष्ठतु, नववर्षम् आरब्धम् ।**
**पति: - किं प्रयोजनम् ?**
**पत्नी - भो:, नूतनं वर्षं, नूतन: आरम्भ: ।**
**पति: - भवतु, भवतु, तर्हि भवती इत: गच्छतु अहं नूतनां निद्राम् आरभे !**

## सुभाषितम्

**– संस्कृतविकिपीडियाजालस्थानात्**

**व्याघ्रीव तिष्ठति जरा परितर्जयन्ती रोगाश्च शत्रव: इव प्रहरन्ति देहम् ।**
**आयु: परिस्त्रवति भिन्नघटादिवाम्भ: लोकस्तथाप्यहितमाचरतीति चित्रम् ॥**

**तात्पर्यम्** – वार्धक्यं व्याघ्री इव मनुष्यं भाययन्ती अस्ति। रोगा: शत्रव: इव शरीरं घातयन्त: सन्ति। भग्नात् घटात् जलं यथा स्त्रवति तथा अस्माकम् आयु: परिस्त्रवन्त् अस्ति। तथापि जना: अन्यान् अपकुर्वन्ति। वयम् अशाश्वता: इति न अवगच्छन्ति एव इत्येतत् विचित्रमेव।

**शतेषु जायते शूर: सहस्त्रेषु च पण्डित: ।**
**वक्ता दशसहस्त्रेषु दाता भवति वा न वा ॥**

**तात्पर्यम्** – शतेषु कश्चन शूर: जायते। सहस्त्रजनेषु कश्चन पण्डित: भवति। दशसहस्त्रेषु जनेषु वक्ता एक: भवति, किन्तु दानी भवति वा न वा इति न ज्ञायते।

**शमयति गजानन्यान् गन्धद्विप: कलभोऽपि सम्भवति सुतरां वेगोदग्रं भुजङ्गशिशोर्विषम् ।**
**भुवमधिपतिर्बालावस्थोऽप्यलं परिरक्षितुं न खलु वयसा जात्यैवायं स्वकार्यसहो भर: ॥**

**तात्पर्यम्** – बालगज: अपि मदेन उन्मत्त: चेत् अन्यान् गजान् जयति। लघुसर्प: भवति चेत् अपि तस्य विष: उग्र: एव भवति। राजा बाल: चेदपि राज्यं पालयितुं समर्थ: भवति। जना: स्ववयसा जात्या वा कर्म आचरन्ति इति नास्ति।

## ज्ञानसरित्

**श्यामः पटेलः**

**अथ द्विचक्रिकानुसन्धानम्** – अस्माभिः सर्वैः द्विचक्रिका चालिता वा इतोऽपि वयं द्विचक्रिकां चालयन्तः स्मः। विमानस्य अनुसंधातारौ राइट–भ्रातरौ अमेरिकादेशस्य ओहायोराज्यस्य डेटनग्रामे द्विचक्रिकायाः प्रतिसंस्करणं कुरुतः स्म इति प्रायः श्रुतं स्यात्। किन्तु द्विचक्रिकायाः शोधविषये अस्मासु अज्ञानं प्रवर्तते।

मित्राणि ! ख्रिस्ताब्दस्य १८१७तमे वर्षे कार्ल–वोन–डेरिस नाम्नः जर्मनीदेशीयः वैज्ञानिकः चक्रद्वयस्य प्रयोगं कृत्वा यानमेकं रचितवान्। किन्तु तस्मिन् 'पेडल' इति न आसीत् अतः पादाभ्यां वेगं प्रदातुं न शक्यमासीत्। एषा एव विश्वस्य प्रथमा द्विचक्रिका आसीत्। किन्तु तदा सा 'ड्रेसाइन' नाम्ना विख्याता जाता। तदनु ख्रिस्ताब्दस्य १८४०तमे वर्षे स्कोटलेंडदेशे कर्कपेट्रिक–मेकमिलन नाम्नः कर्मकरः द्विचक्रिकायाः अग्रिमे चक्रे 'पेडल' इति योजितवान्। येन द्विचक्रिकाचालने तावती सरलता न सञ्जाता। सा द्विचक्रिका 'वेलोसीपेड' नाम्ना प्रसिद्धा आसीत्। ततः ख्रिस्ताब्दस्य १८७९तमे वर्षे हेनरी–लोसन इत्याख्येन कर्मकरेण शृङ्खलायुक्ता द्विचक्रिका निर्मिता। तेन द्वयोः चक्रयोः मध्ये 'पेडल' इति योजितम्। तथा उत्तरस्थेन चक्रेण सह शृङ्खला योजिता। एषा द्विचक्रिका 'सेफ्टी–बाइसिकल' नाम्ना व्यवहृता।

यदा ख्रिस्ताब्दस्य १८८८तमे वर्षे ज्होन–डनलोप–महोदयः 'रबर' इत्यतः चक्रनिर्माणं कृतवान् तस्मात् पूर्वं तु द्विचक्रिकायाः चक्रद्वयं काष्ठस्य लौहस्य वा भवति स्म। ख्रिस्ताब्दस्य १८९०तः द्विचक्रिका सर्वेषां वाहनम् अभवत्। १९०३ तः आरब्धा 'ध टूर डी फ्रान्स' इत्याख्यायाः द्विचक्रिकायाः स्पर्धाऽपि समग्रे विश्वे प्रसिद्धा अभवत्। यद्यपि अद्य अनेकानि वाहनानि सन्ति तथापि दशकोटि यावत् द्विचक्रिकायाः उत्पादनं सम्प्रति भवति।

द्विचक्रिका – cycle, शृङ्खला – chain

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **पेडा** | बड़ा थैला | a large bag |
| **कूर्चः** | गुच्छा | bunch/bundle |
| **शृङ्गः** | सींग | horn |
| **उदरम्** | पेट | stomach |
| **सुमनः** | गेहूं | wheat |
| **दन्तः** | दाँत | teeth |
| **शम्बरम्** | पानी | water |
| **शिखावान्** | आग | fire |
| **शशी** | चाँद | moon |
| **द्रहः** | तालाब | lake |
| **निर्भटः** | कठोर | hard |
| **शलभः** | टिड्डा | grasshopper |
| **प्रस्त्रवणम्** | बह निकलना | flowing forth |
| **निर्झरः** | झरना | spring |
| **द्रूणः** | बिच्छू | scorpion |

## किं भवन्तः जानन्ति ?

**१ ) मत्स्यः कस्य वाहनं वर्तते ?**
(क) इन्द्रस्य (ख) वायोः (ग) वरुणस्य (घ) अग्नेः

**२ ) एतेषु भारतस्य राष्ट्रीयपक्षी कः वर्तते ?**
(क) मयूरः (ख) कपोतः (ग) चातकः (घ) काकः

**३ ) एतेषु कः भारतस्य राष्ट्रीयपशुः वर्तते ?**
(क) व्याघ्रः (ख) मृगः (ग) अश्वः (घ) सिंहः

**४ ) भारतस्य बृहत्तमा मेला का वर्तते ?**
(क) नौचन्दी (ख) पुष्करः (ग) कुम्भः (घ) सोनपुरः

**५ ) हस्तशिल्पकलायाः का मेला ८०० वर्षेभ्यः आयोज्यते ?**
(क) बटेसरमेला (ख) नौचन्दीमेला (ग) मरुमेला (घ) पुस्तकमेला

**६ ) एतेषु कुत्र विश्वपुस्तकमेलायाः आयोजनं भवति ?**
(क) मुम्बईनगरे (ख) देहल्याम् (ग) कोलकातायाम् (घ) बेंगलोरे

**७ ) पशूनां बृहत्तमा मेला कुत्र आयोज्यते ?**
(क) बटेसरे (ख) नौचन्द्याम् (ग) कुम्भे (घ) सोनपुरे

उत्तराणि – (१) ग (२) क (३) क (४) ग (५) ख (६) ख (७) घ

# अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

**Learn Online/Offline**

## संस्कृतभाषाशिक्षणम्
**First Level**

**Date :** 3/11/2025 to 30/1/2026
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 7000/-

**Venue: Satva Vatika**
**Opp Randesan Metro Station Gandhinagar**

**Contact :**
**Dr. Mihir Upadhyay - (91) 098246 16237**
**Ila Joshi +(91) 063510 34630**

EKLAVYA SANSKRIT ACADEMY

**Value Education Through Sanskrit**

## बालसंस्कृतवर्गः
**(Class SKg to 8)**
**Offline**

**Date :** 15/11/2025 to 28/3/2026
**Day :** Saturday
**Time :** 6:00 pm to 7:30 pm (IST)
**Fees :** 4000/-

**Venue: Core House Ahmedabad**
**contact: Dr Mihir Upadhyay, 98246 16237**

**Learn Online/Offline**

## संस्कृतभाषाशिक्षणम्
**First Level**

**Date :** 17/11/2025 to 18/2/2026
**Day :** Mon-Wed-Fri
**Time :** 6:30 pm to 8:00 pm (IST)
**Fees :** 7000/-

**Venue: Core House Ahmedabad**
**contact: Dr Mihir Upadhyay, 98246 16237**

### संस्कृत-साम्प्रतम्

नमस्कारः
यदि भवन्तः ''साम्प्रतम्'' मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | – 100 |
| द्वैवार्षिकं रू | – 175 |
| त्रैवार्षिकं रू | – 250 |
| अङ्कमूल्यं रू | – 10 |

**प्रियवाचकाः**
- **भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।**
- **पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।**

EKLAVYA SANSKRIT ACADEMY
||जयतु संस्कृतं जयतु भारतम्||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006